१ श्री काशीजी मे महल्ला दुधुण नासामाकी ।
गली मे बुतबा बूहरखचंदजी के बाडे मे दुर्गाप्रसाद
कटारे के गणेशयंत्रालय मे दसपाटक छपी मई लिख
टवी त्रसाद तिवाडी का छापनेवाला पूछे श्राही जो
लेय सो कुंजगली के पश्चिमफाटक पर मिले ॥ ॥

का



राम

१

श्रीगणेशायनमः मार्कण्डेयउवाच यद्गुह्यंपरमं
लोकेसर्वरक्षाकरंनृणाम् यन्नकस्यचिदाख्यातं
तन्मेब्रूहिपितामह १ ब्रह्मोवाच अस्तिगुह्यतमं
विप्रसर्वभूतोपकारकम् देव्यास्तुकवचंपुण्यंत
च्छृणुष्वमहामुने २ प्रथमंशैलपुत्रीचद्वितीयं

दु० क० २

ब्रह्मचारिणी तृतीयं चंद्रघंटेति कूष्मांडेति चतुर्थं
कम् ३ पंचमं स्कंदमातेति षष्ठं कात्यायनीति च स
प्तमं कालरात्रीति महागौरीति चाष्टमम् ४ नवमं
सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिताः उक्तान्येतानि
नामानि ब्रह्मणैव महात्मना ५ अग्निना दह्यमान

२

स्तुशत्रुमध्यगतोस्मि विषमेदुर्गमेचैवभयार्त्ताःश
रणंगताः ६ नतेषांजायतेकिंचिदशुभंरणसंकटे
नापदंतस्यपश्यामिशोकदुःखभयंनहि ७ येस्तु
भक्त्यास्मृतानूनंतेषामृद्धिःप्रजायते प्रेतसंस्थातु
चामुण्डावाराहीमहिषासना ८ ऐंद्रीगजसमारू

दु·क· ढा वैष्णवी गरुडासना माहेश्वरीवृषारूढा कौमा
३ रीशिखिवाहना ९ ब्राह्मीहंससमारूढा सर्वाभर
णभूषिता नानाभरणशोभाढ्या नानारत्नोपशो।
भिता १० दृश्यंते रथमारूढा देव्यः क्रोधसमाकु।
लाः शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् ११ ३

खेटकंतोमरंचैवपरशुंपाशमेवच कुंतायुधंत्रि।
शूलंचशार्ङ्गायुधमनुत्तमम् १२ दैत्यानांदेहनाशा
यभक्तानामभयायच धारयंत्यायुधानीत्थंदेवा।
नांचहितायवै १३ महाबलेमहोत्साहेमहाभयवि
नाशिनि त्राहिमांदेविदुःप्रेक्षेशत्रूणांभयवर्द्धि।

दु·क. नि १४ प्राच्यांरक्षतुमामैंद्रीआग्नेय्यामग्निदेवतादः
४ क्षिणेरक्षवाराहिनैर्ऋत्यांखड्गधारिणी १५ प्रती
च्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी रक्षेदुदीच्यां
कौमारीईशान्यांशूलधारिणी १६ उर्ध्वेंब्रह्माणि
मेरक्षेदधस्ताद्वैष्णवीतथा एवंदशदिशोरक्षेच्चा। ४

मुंडाशवबाहना १७ जयामेचाग्रतः पातुविजया
पातुपृष्ठतः अजिताबामपार्श्वेतुदक्षिणेचापरा
जिता १८ शिखामुद्योतिनीरक्षेदुमामूर्द्धिव्यवस्थि
ता मालाधरीललाटेचभ्रुवौरक्षेद्यशस्विनी १९
त्रिनेत्राचभ्रुवोर्मध्येयम घंटाचनासिके शंखिनी

दु॰क॰ ५

चक्षुषोर्मेध्वंश्रोत्रयोर्द्वारवासिनी २० कपोलौ

कालिकारक्षेत्कर्णमूलेतुशांकरी नासिकायां

सुगंधाचउत्तरोष्ठेचचर्चिका २१ घंटिकांचित्रघं

टाचमहामायाचतालुके कामाक्षाचिबुकंरक्षे

द्वाचंमेसर्वमंगला २२ ग्रीवायांभद्रकालीच ५ २४

वंशे धनुर्धरी नीलग्रीवा बहिःकंठनलिकां नल
कूबरी २३ खड्गधारिण्युभौ स्कंधौ बाहू मे वज्रधा
रिणी हस्तयोर्दंडिनी रक्षेदंबिका चांगुलीषु च ।
२४ नखांश्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी ॥
स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी । २५ ।

हृदयेललितादेवीत्वुदरेशूलधारिणी नाभिंच
कामिनीरक्षेनगुह्यंगुह्येश्वरीतथा २६ भूतना
याचमेढ्रंचगुदंमहिषवाहिनी कट्यांभगवती
रक्षेज्जानुनीविंध्यवासिनी २७ जंघेमहावला
प्रोक्ताजानुमध्येविनायकी गुल्फयोर्नारसिंही

चपादपृष्ठमितौजसी २८ पादांगुलीःश्रीधरीच
पादाधस्तलवासिनी नखान्दंष्ट्राःकरालीचके
शांश्चैवोर्द्ध्वकेशिनी २९ रोमकूपाणिकौबेरीत्वं
चंवागीश्वरीतथा रक्तमज्जावसामांसान्यस्थि।
मेदांसिपार्वती ३० अंत्राणिकालरात्रिश्चपित्तं

दु.क. चमुकुटेश्वरी पद्मावतीपद्मकोशेककफेचूडामा ।
णिस्तथा ३१ ज्वालामुखीनखज्वालामभेद्यास
र्वसंधिषु शुक्रंब्रह्माणिमेरक्षेच्छायांछत्रेश्वरी
तथा ३२ अहंकारंमनोबुद्धिंरक्षमेधर्मचारिणी
प्राणापानौतथाव्यानमुदानंचसमानकम् ३३ य

शः कीर्त्तिं च लक्ष्मीं च सदा रक्षतु चक्रिणी गोत्रमिं
द्राणि मे रक्षेत्पशून्मे रक्ष चंडिके ३४ पुत्रान्रक्षे
न्महालक्ष्मीर्भार्यां रक्षतु भैरवी मार्गं क्षेमंकरी र
क्षेद्विजया सर्वतः स्थिता ३५ रक्षाहीनं तु यत्स्था
नं वर्जितं कवचेन तु तत्सर्वं रक्ष मे देवि जयंती पा

पनाशिनी ३६ पदमेकंनगच्छेत्तुयदीच्छेच्छुभ
मात्मनः कवचेनावृतोनित्यंयत्रयत्रहिगच्छ
ति ३७ तत्रतत्रार्थलाभश्चविजयःसार्वकामिकः
यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितम् ३८ प
रमैश्वर्यमतुलंप्राप्स्यतेभूतलेपुमान् निर्भयोजा

यतेमर्त्यः संग्रामेष्वपराजितः ३९ त्रैलोक्येतुभ
वेत्पूज्यः कवचेनावृतःपुमान् इदंतुदेव्याःकव
चंदेवानामपिदुर्लभम् ४० यःपठेत्प्रयतोनित्यं
त्रिसंध्यंश्रद्धयान्वितः दैवीकलाभवेत्तस्यत्रैलो
क्येचापराजितः ४१ जीवेद्वर्षशतंसाग्रमपमृत्यु

दु·क· विवर्जितः नश्यंतिमाचयः सर्वैलूताविस्फोटका
१ दयः ४२ स्थावरंजंगमंचापिकृत्रिमंचापिषड्विषा
मृ अभिचाराणिसर्वाणिमन्त्रयन्त्राणिभूतले ४३
भूचराःखेचराश्चैवजलजाश्चोपदेशिकाः सहजाः १
कुलजामालाडाकिनीशाकिनीतथा ४४ अंतरि

क्षचरा घोरा डाकिन्यश्च महाबलाः ग्रहभूतपि।
शाचाश्च यक्षगंधर्वराक्षसाः ४५ ब्रह्मराक्षसवे।
तालाः कूष्मांडभैरवादयः नश्यंति दर्शनात्तस्य
कवचे हृदि संस्थिते ४६ मानोन्नतिर्भवेद्राज्ञ।
स्तेजोवृद्धिकरं परम् यशसा वर्धते सोपि कीर्ति

दु·क· मंडितभूतले ४७ जपेत्सप्तशतीं चंडीं कृत्वातु कव
१० चंपुरायावद्भूमंडलं धत्ते सशैलवनकाननम् ४८
तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रिकी देहां
तेपरमंस्थानंयत्सुरैरपि दुर्लभम् ४९ प्राप्नोति। १०
पुरुषोनित्यंमहामायाप्रसादतः ५० इतिदेव्याः

कवचंसमाप्तम् श्रीगणेशायनमः मार्कंडे
यउवाच जयंतीमंगलाकालीभद्रकालीक
पालिनीदुर्गाक्षमाशिवाधात्रीस्वाहास्वधान
मोस्तुते १ मधुकैटभविद्राविविधातृवरदेनमः
रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २ महिषासुर

दु॰ स॰ निर्नाशविधात्रिवरदेनमः रूपंदेहि॰ ३ वंदितां।
११ घ्रियुगेदेविदेविसौभाग्यदायिनि रूपंदेहि॰।
४ रक्तवीजवधेदेवि चराडमुराडविनाशिनि रू
पंदेहि॰ ५ अचिंत्यरूपचरितेसर्वशत्रुविनाशि ११
निंरूपंदेहिजयंदेहियशोदेहि॰ ६ नंतेभ्यःसर्व

दाभक्त्याचंडिकेप्रणतायमे रूपंदेहिजयंदेहि
यशोदेहिद्विषोजहि ७ स्तुवद्भ्योभक्तिपूर्वंत्वांचं
डिकेव्याधिनाशिनि रूपंदेहिजयंदेहियशोदेहि
द्विषोजहि ८ चंडिकेसततंयेत्वामर्चयंतीहभ
क्तितः रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ९

दु॰ श्र॰ देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् रूपं दे
१२ हि जयं देहि यशो देहि द्विषो जहि १० विधेहि द्वि
षतां नाशं विधेहि बलमुच्चकैः रूपं देहि जयं दे
हि यशो देहि द्विषो जहि ११ विधेहि देवि कल्या
णं विधेहि विपुलां श्रियम् रूपं देहि जयं देहि य १२

शोदेहिद्विषोजहि १२ विद्यावंतंयशस्वंतंलक्ष्मी
वंतंजनंकुरु रूपंदेहिजयंदेहियशोदेहिद्विषो
जहि १३ प्रचंडदैत्यदर्पघ्ने चंडिकेप्रणतायमे रू
पंदेहिजयंदेहियशोदेहिद्विषोजहि १४ चतुर्भु
जे चतुर्वक्त्रसंस्तुतेपरमेश्वरि रूपंदेहिजयंदेहि

दु.स्त्र. यशोदेहिद्विषोजहि १५ कृष्णेनसंस्तुतेदेविश
१२ श्वद्भक्त्यानथांबिके रूपंदेहिजयंदेहियशोदे
हिद्विषोजहि १६ हिमाचलसुतानाथपूजितेप
रमेश्वरि रूपंदेहिजयंदेहियशोदेहिद्विषोजहि १२
१७ सुरासुरशिरोरत्ननिघृष्टचरणेम्बिके रूपंदे

हिजयंदेहियशोदेहिद्विषोजहि १८ इन्द्राणीप
तिसद्भावपूजितेपरमेश्वरि रूपंदेहिजयंदेहि।
यशोदेहिद्विषोजहि १९ देविप्रचंडदोर्दंडदैत्य
दर्पविनाशिनि रूपंदेहिजयंदेहियशोदेहिद्वि
षोजहि २० देविभक्तजनोद्दामदत्तानंदोदयेंवि

दु. स. के रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २१ प
१४ त्नीमनोरमांदेहिमनोवृत्तानुसारिणीम् तारिणीं
दुर्गसंसारसागरस्यकुलोद्भवाम् २२ इदंस्तोत्रं
पठित्वातुमहास्तोत्रंपठेन्नरः सतुसप्तशतीसं। १४
ख्यावरमाप्नोतिसंपदः।२३। इतिदेव्यात्र्प्रर्गला

स्तुतिःसमाप्ता श्रीगणेशायनमः ऋषिरुवाच
विशुद्धज्ञानदेहायत्रिवेदीदिव्यचक्षुषे श्रेयः
प्राप्तिनिमित्तायनमः सोमार्धधारिणे १ स
र्वमेतद्विजानीयान्मंत्राणामभिकीलकम् ।
सोपिक्षेममवाप्नोतिसंततंजाप्यतत्परः २ सि

दु·की·
१५

ध्यंत्युच्चाटनादीनिवस्तूनिसकलान्यपि एते
नस्तुवतांदेवीस्तोत्रमात्रेणसिध्यति ३ नमं
त्रं नौषधंतत्रनकिंचिदपिविद्यते विनाजा
प्येनसिध्येतसर्वमुच्चाटनादिकम् ४ समग्रा । १५
ण्यपिसेत्स्यंतिलोकशंकामिमांहरः कृत्वा ।।

निमंत्रयामाससर्वमेवमिदंसुभम् ५ स्तोत्रंवै
चंडिकायास्तुतच्चगुर्ह्यंचकारसः समाप्तिर्नेच
पुण्यस्यतांयथावन्नियंत्रणाम् ६ सोपिक्षेमम
वाप्नोतिसर्वमेवनसंशयः कृष्णायांवाचतुर्द
श्यामष्टम्यांवासमाहितः ७ ददातिप्रतिगृह्णा

दु॰की॰ निनान्यथैषाप्रसीदति इत्थंरूपेणकीलितनम
१६ हादेवेनकीलितम् ॥ योनिःकीलांविधायैनां
नित्यंजपतिसंस्फुटम्॥ससिद्धःसगणःसोपिगं
धर्वोजायतेऽवने ९ नचैवाप्यटतस्तस्यभयं १६
क्वापीहजायतेनाल्पमृत्युवशंयातिमृतोमोक्ष

मवानुयात् १० ज्ञात्वा प्रारम्भ कुर्वीत स्वकुर्वा
णो विनश्यति ततो ज्ञात्वैव संपन्नामिदं प्रारम्भ
ते बुधैः ११ सौभाग्यादि विपत्किंचिद्दृश्यते त्व
त्वनाजने तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शु
भम् १२ शनैस्तु जप्यमाने स्मिन्स्तोत्रे संपतिरु

दु·की· च्चकैः भवत्येवसमग्रापिततःप्रारभ्यमेवतत्
१७ १३ ऐश्वर्यंयत्प्रसादेनसौभाग्यारोग्यसंपदः
शत्रुहानिःपरोमोक्षःस्तूयतेसानकिंजनैः।
१४ इतिकीलकस्तोत्रंसम्पूर्णम् श्रीगणेशा १७
यनमः तत्रप्रथमारात्रीव्यख्यदायतीपुरुत्रा

देव्य १ क्षभिःविश्वाऽधिश्रियोधित १ अथद्वि
तीयाओर्वप्राऽअमर्त्यानिवतोदेव्यु १ दूतःज्यो
तिषाबाधतेतमः २ निरुस्वसारमस्कृतोषसं
देव्यायंती अपेदुहासतेतमः २ अथचतुर्थी
सानोअद्ययस्यावयंनितयामंनविक्ष्महिवृक्षे

दु॰सू॰ नवसतिंवयः ४ अथपंचमी निग्रामासोऽस्म
१८ विक्षतुनिपद्वंतोनिपक्षिणः निश्येनासश्चिद
र्थितृ ५ अथषष्ठीयावयावृकं १ वृकंयवया
स्तेनमूर्म्ये अथानःसुतराभव ६ अथसप्तमी
उपमायिपिशतमः कृष्णंव्यक्तमस्थितउषऋ १८

णेवयानय ७ अथाष्टमी उपतेगाऽऽङ्करंवृ
णीष्वदुहितर्दिवः रात्रिस्तोमंनजिग्युषे ८ ॥
इतिरात्रीसूक्तंसमाप्तम् ॥ १ ॥ ४ ॥ ४ ॥ १ ॥

॥ अथदुर्गापाटप्रारंभः ॥

ॐ श्रीगणेशायनमः ॐ नमश्चण्डिकायै अथ
सप्तशतीन्यासः अथप्रथममध्यमोत्तमचरित्रा
णांब्रह्मविष्णुरुद्राऋषयः श्रीमहाकालीमहा
लक्ष्मीमहासरस्वत्योदेवताः गायत्र्युष्णिगनुष्टु
प्छंदांसिनंदाशाकंभरीभीमाःशक्तयःरक्तदंति

कादुर्गोम्नामर्यौवीजानि अग्निर्वायुःसूर्यस्तत्वा
नि ऋग्यजुःसामवेदाध्यानानिसकलकामना
सिद्धयेश्रीमहाकालीमहालक्ष्मीमहासरस्वतीदे
वीनांप्रीत्यर्थेजपेविनियोगः तत्रादौन्यासःखङ्गि
नीशूलिनीघोरा० अंगुष्ठाभ्यांनमःशूलेनपाहि

दुर्गा॰ २

नोदेवि॰ तर्जनीभ्यांनमः प्राच्यांरक्षप्रतीच्यांच॰
मध्यमाभ्यांनमः सौम्यानियानिरूपाणि॰ त्र्या।
नामिकाभ्यांनमः खड्गशूलगदादीनि॰ कनिष्ठि
काभ्यांनमः सर्वस्वरूपेसर्वेशे करतलकरपृष्ठा २
भ्यांनमः एवंहृदयादि खड्गिनीशूलिनीघोराद्य

द्यायनमः मूलेन पाहि नो देवि॰ शिरसे स्वाहा प्रा।
च्यां रक्ष प्रतीच्यां च॰ शिखायै वषट् सौम्यानि या
नि रूपाणि॰ कवचाय हुं खड्गमूलगदादीनि॰ ने
त्रत्रयाय वौषट् सर्वस्वरूपे सर्वेशे अस्त्राय फट्।
अथ ध्यानं खड्गं चक्रगदेषु चापपरिघां शूलं भु

दुर्गा ३ शुंडीशिरःशंखंसंदधतींकरैस्त्रिनयनांसर्वांगभू
षावृतां यांहंतुंमधुकैटभौजलजभूस्तुष्टावसुप्ते
हरौनीलाश्मद्युतिमास्यपादयुगलांसेवेमहाका
लिकाम् १ इतिध्यानं प्रथमचरित्रस्य ब्रह्माऋ ३
षिः महाकालीदेवता गायत्रीछंदः नंदाशक्तिः

रक्तदंतिकाबीजं अग्निस्तत्वं ऋग्वेदस्वरूपं श्री
महाकालीप्रीत्यर्थे प्रथमचरित्रजपेविनियोगः
श्रीगणेशायनमः मार्कंडेयउवाच १ सावर्णिः
सूर्यतनयोयोमनुःकथ्यतेष्टमः निशामयतदुत्
पत्तिंविस्तराद्गदतोमम २ महामायानुभावेनय

दुर्गा·
४

थ्यामन्वन्तराधिपः सबभूवमहाभागःसावर्णिस्त
नयोरवेः २ स्वारोचिषेन्तरेपूर्वंचैत्रवंशसमुद्भवः
सुरथोनामराजाभूत्समस्तेक्षितिमण्डले ४ तस्य
पालयतःसम्यक्प्रजाःपुत्रानिवौरसान् बभूवुः ४
शत्रवोभूपाःकोलाविध्वंसिनस्तथा ५ तस्यतैर

भवद्युद्धमतिप्रबलदरिद्रिनः न्यूनैरपिसतैर्युद्धे।
कोलाविध्वंसिभिर्जितः ६ ततःस्वपुरमायातो।
निजदेशाधिपोभवत् आक्रांतःसमहाभागस्ते
स्तदाप्रबलारिभिः ७ अमात्यैर्वलिभिर्दुष्टैर्दुर्वो।
लस्यदुरात्मभिः कोशोवलंचापहृतंतत्रापिस्व

पुरेततः ॥८॥ ततोमृगयाव्याजेनहृतस्वाम्यःसभूप
तिःएकाकीहयमारुह्यजगामगहनंवनम् ॥९॥
सतत्राश्रममद्राक्षीद्द्विजवर्यस्यमेधसःप्रशांत
श्वापदाकीर्णंमुनिशिष्योपशोभितम् ॥१०॥ तस्थौ
कंचित्सकालंचमुनिनातेनसत्कृतःइतश्चेतश्च

विचरंस्तस्मिन्मुनिवराश्रमे ॥ सोचिंतयत्तदातत्र
ममत्वाकृष्टचेतनः मत्पूर्वैः पालितंपूर्वंमयाही
नंपुरंहितत् ॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते
नवा ॥ नजानेसप्रधानोमेशूरहस्तीसदामदः ॥
ममवैरिवशंयातः कान्भोगानुपलप्स्यते येममा

दुर्गी॰ ६

नुगतानित्यंप्रसादधनभोजनैः १४ अनुवृत्तिंध्रु
वंतेद्यकुर्वंत्यन्यमहीभृतां असम्यग्व्ययशीलैस्तैः
कुर्वद्भिःसततंव्ययं १५ संचितःसोतिदुःखेनक्षयं
कोशोगमिष्यति एतच्चान्यच्चसततंचिंतयामास ६
पार्थिवः १६ तत्रविप्राश्रमाभ्याशेवैश्यमेकंददर्श

सः सपृष्टस्तेनकस्त्वंभोहेतुश्चागमनेत्रकः १७ स
शोकइवकस्मात्त्वंदुर्मनाइवलक्षसे इत्याकर्ण्यव
चस्तस्यभूपतेःप्रणयोदितम् १८ प्रत्युवाचसतंवै
श्यःप्रश्रयावनतोनृपं १९ वैश्यउवाच २० समाधि
र्नामवैश्योहमुत्पन्नोधनिनांकुले २१ पुत्रदारैर्नि

रस्तश्च धनलोभादसाधुभिः विहीनश्च धनैर्दारैः
पुत्रैरादायमेधनं २२ वनमभ्यागतोदुःखीनिरस्त।
श्चाप्तबंधुभिः सोहंनवेद्मिपुत्राणांकुशलाकुशला
त्मिकाम् २३ प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थि
तः किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं २४ कथं।

७

तेकिंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः २५ राजोवाच
२६ यैर्निरस्तोभवाल्लुब्धैःपुत्रदारादिभिर्धनैः २७
तेषुकिंभवतःस्नेहमनुबध्नातिमानसं २८ वैश्यउ
वाच २९ एवमेतद्यथाप्राहभवानस्मद्गतंवचः ३०
किंकरोमिनबध्नातिममनिष्ठुरतांमनःयैस्संत्यज्य

पितृस्नेहं धनलुब्धैर्निराकृतः ११ पतिस्वजनहार्द
ञ्च हार्दितेष्वेव मे मनः किमेतन्नाभिजानामि जान
न्नपि महामते १२ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि
बंधुषु तेषां कृते मे निश्श्वासो दौर्मनस्यं च जायते
१३ करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं १४

मार्कण्डेयउवाच ३५ ततस्तौसहितौविप्रतंमुनिं
समुपस्थितौ ३६ समाधिर्नामवैश्योसौसचपार्थि
वसत्तमः कृत्वातुतौयथान्यायंयथार्हंतेनसंवि
दं ३७ उपविष्टौकथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ
३८ राजोवाच ३९ भगवंस्त्वामहंप्रष्टुमिच्छाम्ये

दुर्गा
९

कंयदस्वनतत् ४० दुःखाय यन्मे मनसः स्वचित्तायत्त
तां विना ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्व
पि ४१ जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ४२ स्व
जनेन च संत्यक्तस्तेषु हार्दी तथाप्यति एवमेषत। ९

थाहंचद्वावप्यत्यन्तदुःखितौ ४३ दृष्टदोषेपिवि
षयेममत्वाकृष्टमानसौ तत्कैनैतन्महाभागय
न्मोहोज्ञानिनोरपि ४४ ममास्यचभवत्येषावि
वेकान्धस्यमूढता ४५ ऋषिरुवाच ४६ ज्ञान
मस्तिसमस्तस्यजंतोर्विषयगोचरे ४७ विषय।

दुर्गा. श्चमहाभागयातिचैवंपृथक्पृथक् दिवा
१० न्धाःप्राणिनःकेचिद्रात्रावन्धास्तथापरे ४८ ।
केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ज्ञा
निनोमनुजाःसत्यंकिंनुतेनहिकेवलम् ४९
यतोहिज्ञानिनःसर्वेपशुपक्षिमृगादयः ज्ञानंच १०

तन्मनुष्याणांयत्तेषांमृगपक्षिणाम् ५० मनुष्या
णांचयत्तेषांतुल्यमन्यत्तथोभयोः ज्ञानेपिसति
पश्यैतानपतंगाञ्छावचञ्चुषु ५१ कणमोक्षादृ
तान्मोहात्पीड्यमानानपिक्षुधा मानुषामनुज
व्याघ्रसाभिलाषाःसुतान्प्रति ५२ लोभात्प्रत्युप

कारायनन्वेतेकिंनपश्यसि तथापिममतावर्त्त।
मोहगर्त्तेनिपातिताः ५३ महामायाप्रभावेणसंसा
रस्थितिकारिणः तन्नात्रविस्मयःकार्योयोगनि
द्राजगत्पतेः ५४ महामायाहरेश्चैतत्तयासंमोह्य
तेजगत् ज्ञानिनामपिचेतांसिदेवीभगवतीहि

सा ५५ बलादाकृष्यमोहायमहामायाप्रयच्छ
ति तयाविसृज्यतेविश्वंजगदेतच्चराचरम् ५६
सैषाप्रसन्नावरदानृणांभवतिमुक्तये साविद्या
परमामुक्तेर्हेतुभूतासनातनी ५७ संसारबन्धहे
तुश्चसैवसर्वेश्वरेश्वरी ५८ राजोवाच ५९ भगव

दुर्गा· न्काहिसादेवीमहामायेतियांभवान्॥ ९॥ ब्रवी
१२ तिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज यत्स्वा
भावाचसादेवीयत्स्वरूपायदुद्भवा॥ १०॥ तत्सर्वं
श्रोतुमिच्छामित्वत्तोब्रह्मविदांवर॥ ११॥ ऋषि
रुवाच॥ १२॥ नित्यैवसाजगन्मूर्तिस्तयासर्वमिदं १२

ततम् ॥६४॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां
मम देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा
॥६५॥ उत्पन्नेति तदा लोके सा नित्याप्यभिधीय
ते योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
॥६६॥ आस्तीर्य शेषमभजत्कल्पान्ते भगवान्प्र

दुर्गा० मुः तदाद्दावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥
१३ ६७ विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः।
६८ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम्
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ६९ १३

विबोधनार्थायहरेर्हरिनेत्रकृतालयाम् विश्वेश्व
रींजगद्धात्रीस्थितिसंहारकारिणीम् ७० निद्रांभ
गवतींविष्णोरतुलांतेजसःप्रभुः ७१ ब्रह्मोवाच
७२ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारःस्वरात्मि
का ७३ सुधात्वमक्षरेनित्येत्रिधामात्रात्मिका

दुर्गा॰ स्थिता अर्द्धमात्रास्थितानित्यायानुच्चार्याविशे
१४ षतः ७४ त्वमेवसात्वंसावित्रीत्वंदेविजननी
परा त्वयैवधार्यतेसर्वंत्वयैतत्सृज्यतेजगत् ७५
त्वयैतत्पाल्यतेदेवित्वमत्स्यन्तेचसर्वदा विसृ १४
ष्टौ सृष्टिरूपात्वंस्थितिरूपाचपालने ७६ तथा

संहृतिरूपान्तेजगतोस्यजगन्मये महाविद्याम
हामायामहामेधामहास्मृतिः ७७ महामोहाच
भवतीमहादेवीमहासुरी प्रकृतिस्त्वंचसर्वस्य।
गुणत्रयविभाविनी ७८ कालरात्रिर्महारात्रि
र्मोहरात्रिश्चदारुणा त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वं

दुर्गा· वुद्धिर्वोधलक्षणा ५९ लज्जापुष्टिस्तथातुष्टिस्त्वं
१५ शान्तिः क्षान्तिरेव च खड्गिनी शूलिनी घोरा गदि
नी चक्रिणी तथा ६० शङ्खिनी चापिनी वाण
भुशुण्डी परिघायुधा सौम्याऽसौम्यतराशेषसौ
म्येभ्यस्त्वऽतिसुन्दरी ६१ परापराणांपरमात्वमेव १५

म्प १

परमेश्वरी यच्चकिंचित्क्वचिद्वस्तुसदसद्वाऽखि
लात्मिके ॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तू
यसेतदा ययात्वयाजगत्स्रष्टाजगत्पाताऽत्तियो
जगत् ॥ सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमि
हेश्वरः विष्णुःशरीरग्रहणमहमीशानएवच ॥

कारितास्तेयतोऽतस्त्वांकःस्तोतुंशक्तिमान्भवे
त्॥ सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसंस्तुता
मोहयैतौदुराधर्षावसुरौमधुकैटभौप्रबोधंच
जगत्स्वामीनीयतामच्युतोलघु ८६ बोधश्च
क्रियतामस्यहन्तुमेतौमहासुरौ ८७ ऋषिरु

वाच ८८ एवंस्तुतातदादेवीतामसीतत्रवेधसा
८९ विष्णोःप्रबोधनार्थायनिहन्तुंमधुकैटभौ
नेत्रास्यनासिकावाहुहृदयेभ्यस्तथोरसः ९०।
निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः उत्त
स्थौचजगन्नाथस्तयामुक्तोजनार्दनः ९१ एका

र्णवेहिशयनात्ततः स ददृशे च तौ मधुकैटभौ दु
रात्मानावतिवीर्यपराक्रमौ १२ क्रोधरक्तेक्षणा
वत्तुं ब्रह्माणं जनितोद्यमौ समुत्थाय ततस्ताभ्यां
युयुधे भगवान्हरिः १३ पञ्चवर्षसहस्राणि बा
हुप्रहरणो विभुः तावप्यतिबलोन्मत्तौ महामा

याविमोहितौ १४ उक्तवन्तौवरोस्मत्तोव्रियता
मितिकेशवम् १५ भगवानुवाच १६ भवेताम्
मद्यमेतुष्टौममवध्यावुभावपि १७ किमन्ये
नवरेणात्रएतावद्धिवृतंमम १८ ऋषिरुवा
च १९ वञ्चिताभ्यामितितदासर्वमापोमयंज

गत् १०० विलोक्यताभ्यांगदितोभगवान्कम
लेक्षणः आवांजहिनयत्रोर्वीसलिलेनपरि
प्लुता १०१ ऋषिरुवाच १०२ तथेत्युक्त्वाभगव
ताशङ्खचक्रगदाभृताँकृत्वाचक्रेणवैछिन्ने
जघनेशिरसीतयोः १०३ एवमेषासमुत्पन्ना।

ब्रह्मणासंस्तुतास्वयम् प्रभावमस्यादेव्यास्तुभू
यःशृणुवदामिते १०४। ।इतिश्रीमार्कण्डेय
पुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येमधुकै
टभवधःप्रथमोध्यायः १ उवाच १४ अर्धं २४
श्लोक ६६ एवं १०४ अथध्यानं अक्षस्रगपर

दुर्गा- शूलं गदे षु कुलिशं पद्मं धनुः कुंडिकां दण्डं शक्ति
१९ मसिं च चर्म जलजं घंटां सुराभाजनं शूलं पाश
सुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभ
मर्दिनीमिह महालक्ष्मीं सरोजस्थितां २ मध्यम
चरित्रस्य विष्णुः ऋषिः महालक्ष्मीर्देवता उष्णि। १९

छंदः शाकंभरीशक्तिः दुर्गाबीजं वायुस्तत्वं य
जुर्वेदस्वरूपं महालक्ष्मीप्रीत्यर्थं मध्यमचरि
त्रजपे विनियोगः ऋषिरुवाच १ देवासुरमभू
द्युद्धं पूर्णमब्दशतं पुरा महिषेसुराणामधिपे देवा
नां च पुरंदरे २ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजि

दुर्गा॰ तम् जित्वाचसकलांन्देवानिन्द्रोभून्महिषासुरः

२० ३ ततःपराजितादेवाःपद्मयोनिंप्रजापतिम् ।

पुरस्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ ४ यथा

वृत्तंतयोस्तद्वन्महिषासुरचेष्टितम् त्रिदशाःक

थयामासुर्देवाभिभवविस्तरम् ५ सूर्येन्द्राग्न्य । २०

निलेन्दूनांयमस्यवरूणस्यच अन्येषांचाधि।
कारान्सस्वयमेवाधितिष्ठति ॥ स्वर्गान्निराकृ
ताःसर्वैस्तेनदेवगणाभुवि विचरंति
यथामर्त्यामहिषेणदुरात्मना ॥ एतद्वःकथि
तंसर्वममरारिविचेष्टितम् शरणंचप्रपन्नाः।

स्मोवधस्तस्यविचिन्त्यताम् ८ इत्थंनिशम्यदे
वानांवचांसिमधुसूदनः चकारकोपंशंभुश्च
भ्रुकुटीकुटिलाननौ ९ ततोऽतिकोपपूर्णस्यच
क्रिणोवदनात्ततः निश्चक्राममहत्तेजोब्रह्मणः
शंकरस्यच १० अन्येषांचैवदेवानांशक्रादीनां

शरीरतः निर्गतंसुमहत्तेजस्तच्चैक्यंसमगच्छत
११ अतीवतेजसःकूटंज्वलन्तमिवपर्वतम् द
दृशुस्तेसुरास्तत्रज्वालाव्याप्तदिगन्तरम् १२ अ
तुलंतत्रतत्तेजःसर्वदेवशरीरजम् एकस्थंतदभू
न्नारीव्याप्तलोकत्रयंत्विषा १३ यदभूच्छांभवंते

जस्तेनाजायतत्तन्मुखम् याम्येनचाभवन्केशा
वाहवोविष्णुतेजसा १४ सौम्येनस्तनयोर्युग्मंम
ध्यंचैन्द्रेणचाभवत् वारुणेनचजङ्घोरूनितं
बस्तेजसाभुवः १५ ब्रह्मणस्तेजसापादौतदङ्गु
ल्योर्कतेजसा वसूनांचकराङ्गुल्यः कौवेरेणच

नासिका १६ तस्यास्तु दन्ताः संभूताः प्राजापत्ये
न तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा
१७ भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा १८ त
तः समस्तदेवानां तेजोराशिसमुद्भवाम् तां वि

दुर्गा· लोक्यमुदंप्रापुरमरामहिषार्द्दिताः १९ शूलंशू
२२ लाद्विनिष्कृष्यददौतस्मैपिनाकधृक् चक्रंच
दत्तवान्कृष्णःसमुत्पाद्यस्वचक्रतः २० शङ्‌।
खंचवरुणःशक्तिंददौतस्मैहुताशनः मारुतो
दत्तवांश्चापंबाणपूर्णेतथेषुधी २१ वज्रमिन्द्रः २२

समुत्पाद्यकुलिशादमराधिपः ददौतस्यैसह
स्राक्षोघण्टामैरावताद्गजात् २२ कालदण्डा
द्यमोदण्डंपाशंचाम्बुपतिर्ददौ प्रजापतिश्चा
क्षमालांददौब्रह्माकमण्डलुम् २३ समस्तरो
मकूपेषुनिजरश्मीन्दिवाकरः कालश्चदत्तवा

दुर्गा॰ न्वङ्कंतस्याम्बरंचनिर्मलम् २४ क्षीरोदश्चामा
२४ लंहारमजरेचतथाम्बरे चूडामणिंतथादिव्यं
कुण्डलेकटकानिच २५ अर्द्धचन्द्रंतथाशुभ्रं
केयूरान्सर्ववाहुषु नूपुरौविमलौतद्वद्ग्रैवेयक २४
मनुत्तमम् २६ अङ्गुलीयकरत्नानिसमस्ता

खड्गंलीपुच विश्वकर्मा ददौ तस्मै परशुं चाति
निर्मलम् २९ अस्त्राण्यनेकरूपाणि तथाभेद्यं
च दंशनम् अम्लानपङ्कजां मालां शिरस्युरसि
चापराम् ३० अददज्जलधिस्तस्मै पङ्कजं चाति
शोभनम् हिमवान्वाहनं सिंहं रत्नानि विविधा

दुर्गा· निच २९ ददावशून्यंसुरयापानपात्रंधनाधि
२५ पः शेषश्चसर्वनागेशोमहामणिविभूषितम्
३० नागहारंददौतस्यैधत्तेयःपृथिवीमिमाम्
अन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा ३१ संमा
नितानना दोच्चैःसाट्टहासंमुहुर्मुहुः तस्यानादे २५

नघोरेणकृत्स्नमापूरितंनभः ३२ अमायतातिमहताप्रतिशब्दोमहानभूत् चुक्षुभुःसकला लोकाःसमुद्राश्चचकम्पिरे ३३ चचालवसुधा चेलुःसकलाश्चमहीधराः जयेतिदेवाश्चमुदा तामूचुःसिंहवाहिनीम् ३४ तुष्टुवुर्मुनयश्चैनां

दुर्गा भक्तिनम्रात्ममूर्त्तयः दृष्ट्वासमस्तंसंक्षुब्धंत्रैलो
२६ क्यममरारयः २५ सन्नद्धाखिलसैन्यास्तेसमुत्त
स्थुरुदायुधाः आः किमेतदितिक्रोधादाभा।
ष्यमहिषासुरः २६ अभ्यधावततंशब्दमशे। २६
षैरसुरैर्वृतः सददर्शततोदेवींव्याप्तलोकत्रयां।

त्विषा ३७ पादाक्रान्त्याननतभुवंकिरीटोल्लिखि
ताम्बराम् क्षोभिताशेषपातालां धनुर्ज्यानिःस्व
नेनताम् ३८ दिशोभुजसहस्रेणसमन्ताद्व्याप्य
संस्थिताम् ततःप्रववृतेयुद्धंतयादेव्यासुरद्वि
षाम् ३९ शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगन्त

दुर्गा० रम्‌ महिषासुरसेनानीश्चिक्षुराख्योमहासुरः

२७ ४० युयुधे चामरश्चान्यैश्चतुरङ्ग बलान्वितः।

रथानामयुतैः षड्भिरुदग्राख्योमहासुरः ४१ अ

युध्यतायुतानांचसहस्रेणमहाहनुः पञ्चाश २७

द्भिश्चनियुतैरसिलोमामहासुरः ४२ अयुता।

नांशतैःषड्भिर्वाष्कलोयुयुधेरणे गजवाजिस
हस्रौघैरनेकैःपरिवारितः ४३ वृत्तोरथानांको
ट्याचयुद्धेतस्मिन्नयुध्यत विडालाख्योयुतानां
चपंचाशद्भिरथायुतैः ४४ युयुधेसंयुगेतत्र
रथानांपरिवारितः अन्येचतत्रायुतशोरथना

दुर्गा· गहयैर्वृताः ४५ युयुधुःसंयुगेदेव्यासहतत्रम
२८ हासुरः कोटिकोटिसहस्रैस्तुरथानांदन्ति।
नांतथा ४६ हयानांचवृतोयुद्धेतत्राभून्महि
षासुरः तोमरैर्भिन्दिपालैश्चशक्तिभिर्मुशलै
स्तथा ४७ युयुधुःसंयुगेदेव्याखड्गैःपरशुपट्टि २८

शैः केचिच्चचिक्षिपुःशक्तीःकेचित्पाशांस्तथा
परे ४८ देवींखड्गप्रहारैस्तुतेतांहन्तुंप्रचक्रमुः
सापिदेवीततस्तानिशस्त्राण्यस्त्राणिचण्डि
का ४९ लीलयैवप्रचिच्छेदनिजशस्त्रास्त्र
वर्षिणी अनायस्ताननादेवीस्तूयमानासुर

दुर्गा ऋषिभिः ५० मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि
२९ चेश्वरी सोपि क्रुद्धो धुतसटो देव्या वाहनकेश
री ५१ चचारासुरसैन्येषु वनेष्विव हुताशनः।
निश्वासान्मुमुचे याश्च युध्यमाना रणेम्बिका॥
५२ तएव सद्यः संभूता गणाः शतसहस्रशः॥ यु २९

युधुस्तेपरशुभिर्भिन्दिपालासिपट्टिशैः ५३ ना
शयंतोसुरगणान्देवीशक्त्युपबृंहिताः अवा
दयन्तपटहान्गणाःशङ्खांस्तथापरे ५४ मृद
ङ्गांश्चतथैवान्येतस्मिन्युद्धमहोत्सवेततोदे
वीत्रिशूलेनगदयाशक्तिवृष्टिभिः ५५ खड्गा

दुर्गा ३०

दिभिश्च शतशो निजघान महासुरान् । पातया
मासचैवान्यान्घण्टास्वनविमोहितान् ५६ ।
असुरान्भुवि पाशेन बध्वा चान्यानकर्षयत् । के
चिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ५७ ३०
विपोथिता निपातेन गदया भुवि शेरते वेमुश्च

केचिद्रुधिरंमुशलेनभूशंहताः ५८ केचिन्नि
पतिताभूमौभिन्नाःशूलेनवक्षसिनिरंतराःश
रौघेणहताःकेचिद्रणाजिरे ५९ सेनानुकारि
णःप्राणान्मुमुचुस्त्रिदशार्दनाः केषांचिद्बाह
वश्छिन्नाश्छिन्नग्रीवास्तथापरे ६०।

दुर्गा· ३१

शिरांसिपेतुरन्येषामन्येमध्येविदारिताः वि

च्छिन्नजङ्घ· घास्त्वपरेपेतुरुर्व्यांमहासुराः ६१

एकबाहूक्षिचरणाकेचिद्देव्याद्विधाकृताः

छिन्नेपिचान्येशिरसिपतिताःपुनरुत्थिताः॥ ३१

६२ कबन्धायुयुधुर्देव्यागृहीतपरमायुधाः

ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः ६३ क
बन्धाश्छिन्नशिरसःखड्गशक्त्यृष्टिपाणयःति
ष्ठतिष्ठेतिभाषन्तोदेवीमन्येमहासुराः ६४ पा
तितैरथनागाश्वैरसुरैश्चवसुन्धरा अगम्या
साभवत्तत्रयत्राभूत्समहारणः ६५ शोणि तौ

दुर्गा० घामहानद्यः सद्यस्तत्रप्रसुस्रुवुः मध्येचासुर
३२ सैन्यस्यवारणासुरवाजिनाम् ६६ क्षणेनतन्महा
सैन्यमसुराणांतथाम्बिका निन्येक्षयंयथाव
ह्निस्तृणदारुमहाचयम् ६७ सचसिंहोमहाना ३२
दमुत्सृजन्धुतकेसरः शरीरेभ्योमरारीणामसू

निववि चिन्वति ६८ देव्यागणैश्चतैस्तत्र क
तं युद्धं तथासुरैः यथैषां तुतुषुर्देवाः पुष्पवृष्टि
मुचो दिवि ६९ इति मार्कण्डेयपुराणे सावर्णि
के मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधो
नाम द्वितीयोऽध्यायः २ उवाच १ श्लोक ६८ ण

दुर्गा· वं ३६ एवमादितः अथध्यान उद्यद्भानुसहस्र
३३ कांतिमरुणक्षौमांशिरोमालिकांरक्तालिप्तपयो
धरांजपवटींविद्यामभीतिंवरां हस्ताब्जैर्दधतं
तींत्रिनेत्रविलसद्वक्त्रारविंदश्रियंदेवींबद्धा
हिमांशुरत्नमुकुटांवन्देसमन्दस्मितां १ अवि ३३

रुवाच १ निहन्यमानं तत्सैन्यमवलोक्य महा।
सुरः सेनानीश्चिक्षुरः कोपाद्ययौयोद्धुमथाम्बि
काम् २ सदेवींशरवर्षेणववर्षसमरेसुरः

यथामेरुगिरेःशृङ्गंतोयवर्षेण।
तोयदः ३ तस्यच्छित्वाततोदेवीलीलयैवश

रोत्करान् जघानतुरगान्बाणैर्यन्तारंचैववाजि
नाम् ४ चिच्छेदचधनुःसद्योध्वजंचातिसमु
च्छ्रितम् विव्याधचैवगात्रेषुछिन्नधन्वानमा
शुगैः ५ सच्छिन्नधन्वाविरथोहताश्वोहतसा
रथिः अभ्यधावततोदेवींखड्गचर्मधरोसुरः

६ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्द्धनि आ
जघानभुजेसव्येदेवीमप्यतिवेगवान् ७ तस्याः
खड्गोभुजंप्राप्यपफालनृपनन्दन ततोजग्रा
हशूलंसकोपादरुणलोचनः ८ चिक्षेपचततस्त
त्तुभद्रकाल्यांमहासुरः जाज्वल्यमानंतेजो

दुर्गा० जोभीरविबिम्बमिवाम्बरात् ९ दृष्ट्वातदापत
५५ च्छूलंदेवीशूलममुञ्चत तच्छूलंशतधातेन
नीतंसचमहासुरः १० हतेतस्मिन्महावीर्येम
हिषस्यचमूपतौ आजगामगजारूढश्चामर
स्त्रिदशार्दनः ११ सोपिशक्तिंमुमोचाथदेव्या ५५

ते

मा

स्तामम्बिकाद्रुतम् हुंकाराभिहतांभूमौपात
यांसनिष्प्रभाम् १९ भग्नांशक्तिंनिपतितांदृष्ट्वा
क्रोधसमन्वितः चिक्षेपचामरःशूलंबाणैस्तद
पिसाच्छिनत् १२ ततःसिंहःसमुत्पत्यगजकु
म्भान्तरास्थितः बाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिद

श्री २५१

दुर्गा०
३६

शारिणा १४ युध्यमानौ ततस्तौ तु तस्मान्नागा
न्महीं गतौ युयुधाते ति संरब्धौ प्रहारै रतिदारु
णैः १५ ततो वेगात्समुत्पत्य निपत्य च मृगारि
णा करप्रहारेण शिरश्चामरस्य पृथक्कृतम्
१६ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः

३६

दन्तमुष्टितलैश्चैवकरालश्चनिपातितः १७।
देवीक्रुद्धागदापातैश्चूर्णयामासचोद्धतम्। बा
ष्कलंभिन्दिपालेनवाणैस्ताम्रंतथान्धकम्। १८
उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुम्। त्रिने।
त्राचत्रिशूलेनजघानपरमेश्वरी १९ विडाल

दुर्गा॰ ५२

ष्यासिनाकायात्पातयामासवैशिरः दुर्धरंदु
र्मुखंचोभौशरैर्निन्येयमक्षयम् २० एवंसंक्षीय
माणेतुस्वसैन्येमहिषासुरः माहिषेणस्वरूपेण
त्रासयामासतान्गणान् २१ कांश्चित्तुण्डप्रहारे ५२
णखुरक्षेपैस्तथापरान् लाङ्गूलताडितांश्चान्या

श्रृङ्गाभ्यांचविदारितान् ॥ वेगेनकांश्चिदप
रान्नादेनभ्रमणेनच निश्वासपवनेनान्यान्पा
तयामासभूतले ॥ निपात्यप्रमथानीकम
भ्यधावतसोसुरः सिंहंहन्तुंमहादेव्याःकोपं।
चक्रेततोम्बिका ॥ सापिकोपान्महावीर्यः

दुर्गा · खुरक्षुण्णमहीतलः शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षे
पचननादञ्च ३५ वेगभ्रमणविक्षुण्णमहीतला
स्य च्यशीर्यंत लाङ्गूलेनाहतश्चाब्धिः प्लावया
मास सर्वतः ३६ धुतशृङ्गविभिन्नाश्च खण्डखण्डं
ययुर्घनाः श्वासानिलास्ताः शतशो निपेतु

नेभसोचलः २७ इतिक्रोधसमाध्मातमापत
न्तंमहासुरम् दृष्ट्वासाचण्डिकाकोपंतद्वधाय
तदाकरोत् २८ साक्षिप्तातस्यवैपाशंतंवबन्ध
महामृधे २९ ततःसिंहोभवत्सद्योयावत्तस्या
म्बिकाशिरः छिनत्तितावत्पुरुषःखड्गपाणिर

सुरम् तत्याजमाहिषंरूपंसोपिबद्धोमहामृधे २ ३दि

दुर्गा
३९

दृश्यत: ३० ततएवाशुपुरुषंदेवीचिच्छेदसा
यकैः तंखड्गचर्मणासार्द्धंततःसोभूत्महागा
जः ३१ करेणचमहासिंहंतंचकर्षजगर्जेचक
र्षतस्तुकरंदेवीखड्गेननिरकृन्तत ३२ ततोम
हासुरोभूयोमाहिषंवपुरास्थितः ततैवक्षोभ ३४

यामासत्रैलोक्यंसचराचरम् ३३ ततःक्रुद्धाजग
न्माताचण्डिकापानमुत्तमम् पपौपुनःपुन
श्चैवजहासारुणलोचना ३४ ननर्दचासुरःसो
पिवलवीर्यमदोद्धतः विषाणाभ्यांचचिक्षेप
चण्डिकांप्रतिभूधरान् ३५ साचतान्प्रहितां

स्तेनचूर्णयन्तीशरोत्करैः उवाचतंमदोद्धूतमु
खरागाकुलाक्षरम् ३६ देव्युवाच ३७ गर्जगर्ज
क्षणंमूढमधुयावत्पिबाम्यहंमयात्वयिहते
त्रैवगर्जिष्यन्त्याशुदेवताः ३८ ऋषिरुवाच।
३९ एवमुक्त्वासमुत्पत्यसारूढातंमहासुरम्।

पादेनाक्रम्यकण्ठेचशूलेनैनमताडयत् ४०।
ततःसोपिपदाक्रान्तस्तयानिजमुखात्ततःअ
र्द्धनिष्क्रान्तएवातिदेव्या ---- वीर्येणसंवृ
तः ४१ अर्द्धनिष्क्रान्तएवासौयुध्यमानोमहा
सुरः तयामहासिनादेव्याशिरश्छित्वानि।

पातितः ४२ ततोहाहाकृतंसर्वंदैत्यसैन्यंनना
शतत् प्रहर्षंचपरंजग्मुःसकलादेवतागणाः
४३ तुष्टुवुस्तांसुरादेवींसहदिव्यैर्महर्षिभिःज
गुर्गन्धर्वपतयोननृतुश्चाप्सरोगणाः ४४ इति
मार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहा ४१

त्येमहिषासुरवधः ३ उवाच ३ श्लोक ५१ ए
वं ५४ एवमादितः २१७ अथध्यानं कालाभ्रा
भांकटाक्षैररिकुलभयदांमौलिबद्धेंदुरेखांशं
खंचक्रंकृपाणंत्रिशिखमपिकरैरुद्वहंतींत्रि
नेत्रां सिंहस्कन्धाधिरूढांत्रिभुवनमखिलंते

दुर्गा ४२

जसा पूरयंती ध्यात्वा दुर्गां जयाख्यां त्रिदशपति
नुतां सेवितां सिद्धिकामैः ४ ऋषिरुवाच १ श
क्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्म
निसुरारिबले च देव्याः तां तुष्टुवुः प्रणतिनम्र ४२
शिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदे

हाः २ देव्यायया ततमिदंजगदात्मशक्त्यानिः।
शेषदेवगणशक्तिसमूहमूर्त्यांतामम्बिकाम
खिलदेवमहर्षिपूज्यांभक्त्यानतास्मविदधातु
शुभानिसानः ३ यस्याःप्रभावमतुलंभगवान
नन्तोब्रह्माहरश्चनहिवक्तुमलंबलंच साच।

ण्डिकाखिलजगत्परिपालनायनाशायचा
शुभभयस्यमतिंकरोतु ४ याश्रीःस्वयंसुकृति
नांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृद
येषुबुद्धिःश्रद्धासतांकुलजनप्रभवस्यलज्जा
तांत्वांनतास्मपरिपालयदेविविश्वम् ५ किंव

र्णयामतवरूपमचिन्त्यमेतत्किंचातिवीर्यमसु
रक्षयकारिभूरि किंचाहवेषुचरितानितवा
द्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु ॥ हे
तुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसेह।
रिहरादिभिरप्यपारासर्वाश्रयाखिलमिदंजग

दुर्गा दंष्ट्राभूतमव्याकृताहिपरमाप्रकृतिस्त्वमाद्या
४४ ७ यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रया
तिसकलेषुमखेषुदेवि स्वाहासिवैपितृगण
स्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधा ४४
च ८ यामुक्तिहेतुरविचिन्त्यमहाव्रताचत्वमभ्य

स्यैसेसुनियतेन्द्रियतत्त्वसारैः मोक्षार्थिभिर्मु।
निभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपर
माहिदेवि ॥ शब्दात्मिकासुविमलर्ग्यजुषां।
निधानमुद्गीथरम्यपदपाठवतांचसाम्नां देवी
त्रयीभगवतीभवभावनायवार्ताचसर्वजगतां

दुर्गा॰ परमार्तिहन्त्री १० मेधासिदेविविदिताखिलशा-
४५ स्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा श्रीःकै-
टभारिहृदयैककृताधिवासागौरीत्वमेवशशि-
मौलिकृतप्रतिष्ठा ११ ईषत्सहासममलंपरिपूर्ण ४५
चन्द्रविम्बानुकारिकनकोत्तमकान्तिकान्तमत्य-

६

त्यद्भुतंप्रहृतमात्तरुषानतथापिवक्त्रंविलोक्यसह
सामहिषासुरेण ११ दृष्ट्वातुदेविकुपितंभ्रुकुटी
करालमुद्यच्छशाङ्कसदृशच्छवियन्नसद्यः प्रा
णान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यतेहि
कुपितान्तकदर्शनेन १२ देविप्रसीदपरमाभवा

दुर्गा॰ तीभवायसद्यो विनाशयसि कोपवती कुलानि ।
४६ विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य १४ ते संमता जनपदेषु धनानि
तेषां तेषां यशांसि न च सीदति धर्मवर्गः धन्यास्त ४६
एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भव

तीप्रसन्ना १५ धर्म्याणिदेविसकलानिसदैवका
र्म्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्र
यातिचततोभवतीप्रसादाल्लोकत्रयेपिफलदा
ननुदेवितेन १६ दुर्गेस्मृताहरसिभीतिमशेषज
न्तोःस्वस्थैःस्मृतामतिमतीवशुभांददासि दारिद्र्य

दुःखभयहारिणिकात्वदन्यासर्वोपकारकरणाय
सदार्द्रचित्ता १७ एभिर्हतैर्जगदुपैतिसुखंतथैतेकु
र्वन्तुनामनरकायचिरायपापम् संग्राममृत्युम
धिगम्यदिवंप्रयान्तुमत्वेतिनूनमहितान्विनिहं
सिदेवि १८ दृष्ट्वैवकिंनभवतीप्रकरोतिभस्मसा। ४७

वासुरानरिक्षुयत्प्रहिणोषिशस्त्रम् लोकान्प्रया।
न्तुरिपवोपिहिशस्त्रपूताइत्थंमतिर्भवतितेष्व
पितेतिसाध्वी १९ खड्गप्रभानिकरविस्फुरणै।
स्तथोग्रैः शूलाग्रकान्तिनिवहेनदृशोसुराणाम्
यन्नागतानाविलयमंशुमदिन्दुखण्डयोग्याननंतव

दुर्गा· वविलोकयन्तांतदेतत् २० दुर्वृत्तवृत्तशमनंतव
४८ देविशीलंरूपंतथैतदविचिन्त्यमतुल्यमन्यैःवी
र्यंचहन्तृहृतदेवपराक्रमाणांवैरिष्वपिप्रकटि
तैवदयात्वयेत्थम् २१ केनोपमाभवतुतेस्यपरा ४८
क्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र चित्तेकृ

पासमरनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवन
त्रयेपि २२ त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रा
तंत्वयासमरमूर्द्धनितेपिहत्वानीतादिवंरिपुग
णाभयमप्यपास्तमस्माकमुन्मदसुरारिभवंनम
स्ते २३ शूलेनपाहिनोदेविपाहिखड्गेनचाम्बिके

दुर्गा· घंटास्वनेननःपाहिचापज्यानिस्वनेनच २४।

४९ प्राच्यांरक्षप्रतीच्यांचचण्डिकेरक्षदक्षिणे भ्राम

णेनात्मशूलस्यउत्तरस्यांतथेश्वरी २५ सौम्यानि

यानिरूपाणित्रैलोक्येविचरंतिते यानिचात्य

र्थघोराणितैरक्षास्मांस्तथाभुवम २६ खड्गशू ४९

लगदादीनियानि चास्त्राणितेम्बिके करपल्लव
सङ्गीनितैरस्मान्रक्षसर्वतः २७ ऋषिरुवाच २८
एवंस्तुतासुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः अर्चि।
ताजगतांधात्रीतथागन्धानुलेपनैः भक्त्यासम
स्तैस्त्रिदशैर्दिव्यैर्धूपैश्चधूपिता प्राहप्रसादसु

देसाम्यः अमनिप्रीत्यात्तवेरैभिस्तपूजिता २७

दुर्गा मुखीस्तमम्लान्प्रणतान्सुरान् ३० देव्युवाच ३१ व्रि

५० यतां त्रिदशाः सर्वे यदस्मत्तोभिवाञ्छितम् ३२ दे

वा ऊचुः ३३ भगवत्या कृतं सर्वं न किंचिदवशिष्य

ते ३४ यदयं निहतः शत्रुरस्माकं महिषासुरः य। ५०

दिचापि वरो देयस्त्वयास्माकं महेश्वरि ३५ संस्म

तासंस्मृतात्वंनोहिंसेथाःपरमापदः यश्चमर्त्यैः
स्तवैरेभिस्त्वांस्तोष्यत्यमलानने ३६ तस्यवित्त।
र्द्धिविभवैर्धनदारादिसंपदाम् वृद्धयेस्मत्प्रसन्ना
त्वंभवेथाःसर्वदाम्बिके ३७ ऋषिरुवाच ३८ इ
तिप्रसादितादेवैर्जगतोर्थेतथात्मनः तथेत्यु।

दुर्गा· न्त्काभद्रकालीवभूवान्तर्हितानृप ३९ इत्येतत्क
५१ थितंभूपसंभूतासायथापुरादेवीदेवशरीरेभ्योज
गत्त्रयहितैषिणी ४० पुनश्चगौरीदेहात्सासमुद्भूता
यथाभवत् वधायदुष्टदैत्यानांतथाशुम्भनिशु ५१
म्भयोः ४१ रक्षणायचलोकानांदेवानामुपका

रिणी तच्छृणुष्वमयाख्यातंयथावत्कथयामिते
४२ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदे
वीमाहात्म्येमहिषासुरवधोनामचतुर्थोध्यायः
४ उवाच ५ अर्धे २ श्लोक ३५ एवं ४२ एवमादितः
२५९ अथध्यानं घंटाशूलहलानिशंखमुशले

चक्रंधनुःशायकंहस्ताब्जैर्दधतींघनांतविलस
च्छीतांशुतुल्यप्रभांगौरीदेहसमुद्भवांत्रिजग
तामाधारभूतांमहापूर्वामत्रसरस्वतीमनुभ
जेशुंभादिदैत्यार्दिनीम् ५ उत्तमचरितस्यरुद्र ५२
ऋषिः महासरस्वतीदेवता अनुष्टुपछंदः भी

माशक्तिःभ्रामरीबीजंसूर्यस्तत्वंसामवेदस्वरू
पंमहासरस्वतीप्रीत्यर्थेउत्तमचरितजपेविनियो
गः ऋषिरुवाच १ पुराशुम्भनिशुम्भाभ्यामसु
राभ्यांशचीपतेः त्रैलोक्यंयज्ञभागाश्चहृतामद
वलाश्रयात् २ तावेवसूर्यतांतद्वदधिकारंतथै

न्दवम् कौवेरमथयाम्यं च चक्राते वरुणस्य च ३
तावेवपवनर्द्धिं च चक्रतुर्वह्निकर्म च ततोदेवा
विनिर्धूताभ्रष्टराज्याःपराजिताः ४ हृताधिका
रास्त्रिदशास्ताभ्यांसर्वेनिराकृताः महासुराभ्यां
तांदेवींसंस्मरन्त्यपराजिताम् ५ तयास्माकंवरो

दत्तोयथापत्युस्मृताखिलाः भवन्तोनाशयिष्या
मितत्क्षणात्परमापदः ६ इतिकृत्वामतिंदेवाहि
मवन्तंनगेश्वरम् जग्मुस्तत्रततोदेवींविष्णुमा
यांप्रतुष्टुवुः ७ देवाऊचुः ८ नमोदेव्यैमहादेव्यै
शिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताः

दुर्गा० प्रणताःस्मताम् ९ रौद्रायैनमोनित्यायैगौर्य्यैधा
५८ त्र्यैनमोनमः ज्योत्स्नायैचेन्दुरूपिण्यैसुखायै
सततंनमः १० कल्याण्यैप्रणतावृद्ध्यैसिद्ध्यैकु
र्म्यैनमोनमः नैर्ऋत्यैभूभृतांलक्ष्म्यैशर्वाण्यैते
नमोनमः ११ दुर्गायैदुर्गपारायैसारायैसर्वका ५८

रितायै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः
१२ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः १३ या
देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै
१४ नमस्तस्यै १५ नमस्तस्यै नमो नमः १६ या॰

दुर्गा॰ चेतनेत्यभिधीयते नमस्तस्यै १७ नमस्तस्यै १८

५५ नमस्तस्यै नमोनमः १९ यादे॰ बुद्धिरूपेण सं।

स्थिता नमः २२ या॰ निद्रा॰ २५ या॰ क्षुधा॰ २८।

या॰ छाया॰ ३१ या॰ शक्ति ३४ या॰ तृष्णा॰ ३७

या॰ क्षान्तिरू॰ ४० या॰ जाति॰ ४३ या॰ लज्जा॰ ५५

४६ या० शान्ति० ४९ या० श्रद्धा० ५२ या० कान्ति०
५५ या० लक्ष्मी० ५८ या० वृत्ति० ६१ या० स्मृति०
६४ या० दया० ६७ या० तुष्टि० ७० यादे० मातृ०
७३ या० भ्रान्ति० ७६ इन्द्रियाणामधिष्ठात्री भू
तानांचाखिलेषुया भूतेषुसततंतस्यैव्याप्तिदे

स्यैनमोनमः ७७ चितिरूपेणयाकृत्स्नमेतद्व्या
प्यस्थिताजगत् नमस्तस्यै ७८ नमस्तस्यै ७९ नम
स्तस्यैनमोनमः ८० स्तुतासुरैःपूर्वमभीष्टसंश्र
यातथासुरेन्द्रेणदिनेषुसेविता करोतुसानः
शुभहेतुरीश्वरीशुभानिभद्राण्यभिहन्तुचाप

द: ॥१॥ यासांप्रतंचोद्धतदैत्यनाथपितैरस्माभिरी

शाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवह

न्तिनःसर्वापदोभक्तिविनम्रमूर्त्तिभिः ॥२॥ ऋ

षिरुवाच ॥२॥ एवंस्तवादियुक्तानांदेवानांतत्र

पार्वती स्नातुमभ्याययौतोयेजाह्नव्यानृपनन्द

दुर्गा न ८४ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिःस्तूयतेत्रका
५२ शरीरकोशतश्चास्याःसमुद्भूताब्रवीच्छिवा ॥
८५ स्तोत्रंममैतत्क्रियतेशुम्भदैत्यनिराकृतैः।
देवैःसमेतैःसमरेनिशुम्भेनपराजितैः ८६ श
रीरकोशाद्यत्तस्याःपार्वत्यानिःसृताम्बिकाको ५१

शिकीतिसमस्तेषुततोलोकेषुगीयते ८७ तस्यां
विनिर्गतायांतुकृष्णाभूत्सापिपार्वती कालिके
तिसमाख्याताहिमाचलकृताश्रया ८८ ततो
म्बिकांपरंरूपंविभ्राणांसुमनोहरम् ददर्शचं
डोमुण्डश्चभृत्यौशुम्भनिशुम्भयोः ८९ ताभ्यां

दुर्गा· ५८

शुम्भायचाख्याताञ्चतीवसुमनोहरा काप्यास्ते
स्त्रीमहाराजभासयन्तीहिमाचलम् १० नैवता
दृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमम् ज्ञायतांका
प्यसौदेवीगृह्यतांचासुरेश्वर· ११ स्त्रीरत्नमति
चार्वङ्गीद्योतयन्तीदिशस्त्विषा सातुतिष्ठतिदे ५८

त्येन्द्रतांभवान्द्रष्टुमर्हति — ११ यानि
रत्नानिमणयोगजाश्वादीनिवैप्रभो त्रैलोक्ये
तुसमस्तानिसांप्रतंभान्तितेगृहे १२ ऐरावतः
समानीतोगजरत्नंपुरंदरात् पारिजाततरुश्चा
यंतथैवोच्चैःश्रवाहयः १४ विमानंहंससंयुक्त

गो

